**વાચકેન્દ્રોમાસ્વાતિવિરચિતં**
**શ્રીપ્રશમરતિપ્રકરણમ્ ।**

નાભેયાદ્યાઃ સિદ્ધાર્થરાજસૂનુચરમાશ્ચરમદેહાઃ ।
પઞ્ચ નવ દશ ચ, દશવિધધર્મવિધિવિદો જયન્તિ જિનાઃ ॥૧॥
જિનસિદ્ધાચાર્યોપાધ્યાયાન્ પ્રણિપત્ય સર્વસાધૂંશ્ચ ।
પ્રશમરતિસ્થૈર્યાર્થં વક્ષ્યે જિનશાસનાત્કિઞ્ચિત્ ॥૨॥
યદ્યપ્યનન્તગમપર્યાયાર્થહેતુનયશબ્દરત્નાઢ્યમ્ ।
સર્વજ્ઞશાસનપુરં પ્રવેષ્ટુમબહુશ્રુતૈર્દુઃખમ્ ॥૩॥
શ્રુતબુદ્ધિવિભવપરિહીણકસ્તથાપ્યહમશક્તિમવિચિન્ત્ય ।
દ્રમક ઇવાવયવોઞ્છકમન્વેષ્ટું તત્પ્રવેશેપ્સુઃ ॥૪॥
બહુભિર્જિનવચનાર્ણવપારગતૈઃ કવિવૃષૈર્મહામતિભિઃ ।
પૂર્વમનેકાઃ પ્રથિતાઃ પ્રશમજનનશાસ્ત્રપદ્ધતયઃ ॥૫॥
તાભ્યો વિસૃતાઃ શ્રુતવાક્પુલાકિકાઃ પ્રવચનાશ્રિતાઃ કાશ્ચિત્ ।
પારમ્પર્યાદુચ્છેષિકાઃ કૃપણકેન સંહૃત્ય ॥૬॥
તદ્ભક્તિબલાર્પિતયા મયાપ્યવિમલાલ્પયા સ્વમતિશક્ત્યા ।
પ્રશમેષ્ટતયાનુસૃતા વિરાગમાર્ગૈકપદિકેયમ્ ॥૭॥
યદ્યપ્યવગીતાર્થા ન વા કઠોરપ્રકૃષ્ટભાવાર્થા ।
સદ્ભિસ્તથાપિ મય્યનુકમ્પૈકરસૈરનુગ્રાહ્યા ॥૮॥
કોઽત્ર નિમિત્તં વક્ષ્યતિ નિસર્ગમતિસુનિપુણોઽપિ વાદ્યન્યત ।
દોષમલિનેઽપિ સન્તો યદ્ગુણસારગ્રહણદક્ષાઃ ॥૯॥
સદ્ભિઃ સુપરિગૃહીતં યત્કિઞ્ચિદપિ પ્રકાશતાં યાતિ।
મલિનોઽપિ યથા હરિણઃ પ્રકાશતે પૂર્ણચન્દ્રસ્થઃ ॥૧૦॥
બાલસ્ય યથા વચનં કાહલમપિ શોભતે પિતૃસકાશે ।
તદ્વત્સજ્જનમધ્યે પ્રલપિતમપિ સિદ્ધિમુપયાતિ ॥૧૧॥
યે તીર્થકૃત્પ્રણીતા ભાવાસ્તદનન્તરૈશ્ચ પરિકથિતાઃ ।
તેષાં બહુશોઽપ્યનુકીર્તનં ભવતિ પુષ્ટિકરમેવ ॥૧૨॥
યદ્વદ્વિષઘાતાર્થં મન્ત્રપદે ન પુનરુક્તદોષોઽસ્તિ ।
તદ્વદ્રાગવિષઘ્નં પુનરુક્તમદુષ્ટમર્થપદમ્ ॥૧૩॥
યદ્વદુપયુક્તપૂર્વમપિ ભૈષજં સેવ્યતેઽર્ત્તિનાશાય ।
તદ્વદ્રાગાર્ત્તિહરં બહુશોઽપ્યનુયોજ્યમર્થપદમ્ ॥૧૪॥
વૃત્ત્યર્થં કર્મ યથા તદેવ લોકઃ પુનઃ પુનઃ કુરુતે ।
એવં વિરાગવાર્તાહેતુરપિ પુનઃ પુનશ્ચિન્ત્યઃ ॥૧૫॥
દૃઢતામુપૈતિ વૈરાગ્યભાવના યેન યેન ભાવેન ।
તસ્મિંસ્તસ્મિન્ કાર્યઃ કાયમનોવાગ્ભિરભ્યાસઃ ॥૧૬॥
માધ્યસ્થ્યં વૈરાગ્યં વિરાગતા શાન્તિરુપશમઃ પ્રશમઃ ।
દોષક્ષયઃ કષાયવિજયશ્ચ વૈરાગ્યપર્યાયાઃ ॥૧૭॥
ઇચ્છા મૂર્ચ્છા કામઃ સ્નેહો ગાર્ધ્યં મમત્વમઽભિનન્દઃ ।
અભિલાષ ઇત્યનેકાનિ રાગપર્યાયવચનાનિ ॥૧૮॥
ઈર્ષ્યા રોષો દોષો દ્વેષઃ પરિવાદમત્સરાસૂયાઃ ।
વૈરપ્રચણ્ડનાદ્યા નૈકે દ્વેષસ્ય પર્યાયાઃ ॥૧૯॥

jainuniversity.org
सर्वज्ञानाय भवतु

રાગદ્વેષપરિગતો મિથ્યાત્વોપહતકલુષયા દૃષ્ટ્યા ।
પઞ્ચાસ્રવમલબહુલાર્ત્તરૌદ્રતીવ્રાભિસન્ધાનઃ ॥૨૦॥
કાર્યાકાર્યવિનિશ્ચયસઙ્ક્લેશવિશુદ્ધિલક્ષણૈર્મૂઢઃ ।
આહારભયપરિગ્રહમૈથુનસંજ્ઞાકલિગ્રસ્તઃ ॥૨૧॥
ક્લિષ્ટાષ્ટકર્મબન્ધનબદ્ધનિકાચિતગુરુર્ગતિશતેષુ ।
જન્મમરણૈરજસ્રં બહુવિધપરિવર્તનાભ્રાન્તઃ ॥૨૨॥
દુઃખસહસ્રનિરન્તરગુરુભારાક્રાન્તકર્ષિતઃ કરુણઃ ।
વિષયસુખાનુગતતૃષઃ કષાયવક્તવ્યતામેતિ ॥૨૩॥
સ ક્રોધમાનમાયાલોભૈરતિદુર્જયૈઃ પરામૃષ્ટઃ ।
પ્રાપ્નોતિ યાનનર્થાન્ કસ્તાનુદ્દેષ્ટુમપિ શક્તઃ ॥૨૪॥
ક્રોધાત્પ્રીતિવિનાશં માનાદ્વિનયોપઘાતમાપ્નોતિ ।
શાઠ્યાત્પ્રત્યયહાનિં સર્વગુણવિનાશનં લોભાત્ ॥૨૫॥
ક્રોધઃ પરિતાપકરઃ સર્વસ્યોદ્વેગકારકઃ ક્રોધઃ ।
વૈરાનુષઙ્ગજનકઃ ક્રોધઃ ક્રોધઃ સુગતિહન્તા ॥૨૬॥
શ્રુતશીલવિનયસંદૂષણસ્ય ધર્માર્થકામવિઘ્નસ્ય ।
માનસ્ય કોઽવકાશં મુહૂર્તમપિ પણ્ડિતો દદ્યાત્ ॥૨૭॥
માયાશીલઃ પુરુષો યદ્યપિ ન કરોતિ કિઞ્ચિદપરાધમ્ ।
સર્પ ઇવાવિશ્વાસ્યો ભવતિ તથાપ્યાત્મદોષહતઃ ॥૨૮॥
સર્વવિનાશાશ્રયિણઃ સર્વવ્યસનૈકરાજમાર્ગસ્ય ।
લોભસ્ય કો મુખગતઃ ક્ષણમપિ દુઃખાન્તરમુપેયાત્ ॥૨૯॥
એવં ક્રોધો માનો માયા લોભશ્ચ દુઃખહેતુત્વાત્ ।
સત્ત્વાનાં ભવસંસારદુર્ગમાર્ગપ્રણેતારઃ ॥૩૦॥
મમકારાહઙ્કારાવેષાં મૂલં પદદ્વયં ભવતિ ।
રાગદ્વેષાવિત્યપિ તસ્યૈવાન્યસ્તુ પર્યાયઃ ॥૩૧॥
માયાલોભકષાયશ્ચેત્યેતદ્રાગસંજ્ઞિતં દ્વન્દ્વમ્ ।
ક્રોધો માનશ્ચ પુનર્દ્વેષ ઇતિ સમાસનિર્દિષ્ટઃ ॥૩૨॥
મિથ્યાદૃષ્ટ્યવિરમણપ્રમાદયોગાસ્તયોર્બલં દૃષ્ટમ્ ।
તદુપગૃહીતાવષ્ટવિધકર્મબન્ધસ્ય હેતૂ તૌ ॥૩૩॥
સ જ્ઞાનદર્શનાવરણવેદ્યમોહાયુષાં તથા નામ્નઃ ।
ગોત્રાન્તરાયયોશ્ચેતિ કર્મબન્ધોઽષ્ટધા મૌલઃ ॥૩૪॥
પઞ્ચનવદ્વ્યષ્ટાવિંશતિકશ્ચતુઃષટ્કસપ્તગુણભેદઃ ।
દ્વિપઞ્ચભેદ ઇતિ સપ્તનવતિભેદાસ્તથોત્તરતઃ ॥૩૫॥
પ્રકૃતિરિયમનેકવિધા સ્થિત્યનુભાવપ્રદેશતસ્તસ્યાઃ ।
તીવ્રો મન્દો મધ્ય ઇતિ ભવતિ બન્ધોદયવિશેષઃ ॥૩૬॥
તત્ર પ્રદેશબન્ધો યોગાત્તદનુભવનં કષાયવશાત્ ।
સ્થિતિપાકવિશેષસ્તસ્ય ભવતિ લેશ્યાવિશેષેણ ॥૩૭॥
તાઃ કૃષ્ણનીલકાપોતતૈજસીપદ્મશુક્લનામાનઃ ।
શ્લેષ ઇવ વર્ણબન્ધસ્ય કર્મબન્ધસ્થિતિવિધાત્ર્યઃ ॥૩૮॥
કર્મોદયાદ્ ભવગતિર્ભવગતિમૂલા શરીરનિર્વૃત્તિઃ ।
દેહાદિન્દ્રિયવિષયા વિષયનિમિત્તે ચ સુખદુઃખે ॥૩૯॥

jainuniversity.org

દુઃખદ્વિટ્ સુખલિપ્સુર્મોહાન્ધત્વાદદૃષ્ટગુણદોષઃ ।
યાં યાં કરોતિ ચેષ્ટાં તયા તયા દુઃખમાદત્તે ॥૪૦॥
કલરિભિતમધુરગાન્ધર્વતૂર્યયોષિદ્વિભૂષણરવાદ્યૈઃ ।
શ્રોત્રાવબદ્ધહૃદયો હરિણ ઇવ વિનાશમુપયાતિ ॥૪૧॥
ગતિવિભ્રમેઙ્ગિતાકારહાસ્યલીલાકટાક્ષવિક્ષિપ્તઃ ।
રૂપાવેશિતચક્ષુઃ શલભ ઇવ વિપદ્યતે વિવશઃ ॥૪૨॥
સ્નાનાઙ્ગરાગવર્તિકવર્ણકધૂપાધિવાસપટવાસૈઃ ।
ગન્ધભ્રમિતમનસ્કો મધુકર ઇવ નાશમુપયાતિ ॥૪૩॥
મિષ્ટાન્નપાનમાંસૌદનાદિમધુરરસવિષયગૃદ્ધાત્મા ।
ગલયન્ત્રપાશબદ્ધો મીન ઇવ વિનાશમુપયાતિ ॥૪૪॥
શયનાસનસમ્બાધનસુરતસ્નાનાનુલેપનાસક્તઃ ।
સ્પર્શવ્યાકુલિતમતિર્ગજેન્દ્ર ઇવ બધ્યતે મૂઢઃ ॥૪૫॥
એવમનેકે દોષાઃ પ્રણષ્ટશિષ્ટેષ્ટદૃષ્ટિચેષ્ટાનામ્ ।
દુર્નિયમિતેન્દ્રિયાણાં ભવન્તિ બાધાકરા બહુશઃ ॥૪૬॥
એકૈકવિષયસઙ્ગાદ્રાગદ્વેષાતુરા વિનષ્ટાસ્તે ।
કિં પુનરનિયમિતાત્મા જીવઃ પઞ્ચેન્દ્રિયવશાર્તઃ ॥૪૭॥
ન હિ સોઽસ્તીન્દ્રિયવિષયો યેનાભ્યસ્તેન નિત્યતૃષિતાનિ ।
તૃપ્તિં પ્રાપ્નુયુરક્ષાણ્યનેકમાર્ગપ્રલીનાનિ ॥૪૮॥
કશ્ચિચ્છુભોઽપિ વિષયઃ પરિણામવશાત્પુનર્ભવત્યશુભઃ ।
કશ્ચિદશુભોઽપિ ભૂત્વા કાલેન પુનઃ શુભીભવતિ ॥૪૯॥
કારણવશેન યદ્યત્ પ્રયોજનં જાયતે યથા યત્ર ।
તેન તથા તં વિષયં શુભમશુભં વા પ્રકલ્પયતિ ॥૫૦॥
અન્યેષાં યો વિષયઃ સ્વાભિપ્રાયેણ ભવતિ તુષ્ટિકરઃ ।
સ્વમતિવિકલ્પાભિરતાસ્તમેવ ભૂયો દ્વિષન્ત્યન્યે ॥૫૧॥
તાનેવાર્થાન્દ્વિષતસ્તાનેવાર્થાન્પ્રલીયમાનસ્ય ।
નિશ્ચયતોઽસ્યાનિષ્ટં ન વિદ્યતે કિઞ્ચિદિષ્ટં વા ॥૫૨॥
રાગદ્વેષોપહતસ્ય કેવલં કર્મબન્ધ એવાસ્ય ।
નાન્યઃ સ્વલ્પોઽપિ ગુણોઽસ્તિ યઃ પરત્રેહ ચ શ્રેયાન્ ॥૫૩॥
યસ્મિન્નિન્દ્રિયવિષયે શુભમશુભં વા નિવેશયતિ ભાવમ્ ।
રક્તો વા દ્વિષ્ટો વા સ બન્ધહેતુર્ભવતિ તસ્ય ॥૫૪॥
સ્નેહાભ્યક્તશરીરસ્ય રેણુના શ્લિષ્યતે યથા ગાત્રમ્ ।
રાગદ્વેષક્લિન્નસ્ય કર્મબન્ધો ભવત્યેવમ્ ॥૫૫॥
એવં રાગદ્વેષૌ મોહા મિથ્યાત્વમવિરતિશ્ચૈવ ।
એભિઃ પ્રમાદયોગાનુગૈઃ સમાદીયતે કર્મ ॥૫૬॥
કર્મમયઃ સંસારઃ સંસારનિમિત્તકં પુનર્દુઃખમ્ ।
તસ્માદ્રાગદ્વેષાદયસ્તુ ભવસન્તતેર્મૂલમ્ ॥૫૭॥
એતદ્દોષમહાસઞ્ચયજાલં શક્યમપ્રમત્તેન ।
પ્રશમસ્થિતેન ઘનમપ્યુદ્વેષ્ટયિતું નિરવશેષમ્ ॥૫૮॥
અસ્ય તુ મૂલનિબન્ધં જ્ઞાત્વા તચ્છેદનોદ્યમપરસ્ય ।
દર્શનચારિત્રતપઃસ્વાધ્યાયધ્યાનયુક્તસ્ય ॥૫૯॥

jainuniversity.org
सर्व ज्ञानाय भवतु

પ્રાણવધાનૃતભાષણપરધનમૈથુનમમત્વવિરતસ્ય ।
નવકોટ્યુદ્ગમશુદ્ધોઞ્છમાત્રયાત્રાધિકારસ્ય ॥૬૦॥
જિનભાષિતાર્થસદ્ભાવભાવિનો વિદિતલોકતત્ત્વસ્યં ।
અષ્ટાદશશીલાઙ્ગસહસ્રધારણકૃતપ્રતિજ્ઞસ્ય ॥૬૧॥
પરિણામમપૂર્વમુપાગતસ્ય શુભભાવનાધ્યવસિતસ્ય ।
અન્યોઽન્યમુત્તરોત્તરવિશેષમભિપશ્યતઃ સમયે ॥૬૨॥
વૈરાગ્યમાર્ગસમ્પ્રસ્થિતસ્ય સંસારવાસચકિતસ્ય ।
સ્વહિતાર્થાભિરતમતેઃ શુભેયમુત્પદ્યતે ચિન્તા ॥૬૩॥
ભવકોટીભિરસુલભં માનુષ્યં પ્રાપ્ય કઃ પ્રમાદો મે ।
ન ચ ગતમાયુર્ભૂયઃ પ્રત્યેત્યપિ દેવરાજસ્ય ॥૬૪॥
આરોગ્યાયુર્બલસમુદયાશ્ચલા વીર્યમનિયતં ધર્મે ।
તલ્લબ્ધ્વા હિતકાર્યે મયોદ્યમઃ સર્વથા કાર્યઃ ॥૬૫॥
શાસ્ત્રાગમાદૃતે ન હિતમસ્તિ ન ચ શાસ્ત્રમસ્તિ વિનયમૃતેઃ ।
તસ્માચ્છાસ્ત્રાગમલિપ્સુના વિનીતેન ભવિતવ્યમ્ ॥૬૬॥
કુલરૂપવચનયૌવનધનમિત્રૈશ્વર્યસમ્પદપિ પુંસામ્ ।
વિનયપ્રશમવિહીના ન શોભતે નિર્જલેવ નદી ॥૬૭॥
ન તથા સુમહાર્ધ્યૈરપિ વસ્ત્રાભરણૈરલઙ્કૃતો ભાતિ ।
શ્રુતશીલમૂલનિકષો વિનીતવિનયો યથા ભાતિ ॥૬૮॥
ગુર્વાયત્તા યસ્માચ્છાસ્ત્રારમ્ભા ભવન્તિ સર્વેઽપિ ।
તસ્માદ્ગુર્વારાધનપરેણ હિતકાઙ્ક્ષિણા ભાવ્યમ્ ॥૬૯॥
ધન્યસ્યોપરિ નિપતત્યહિતસમાચરણધર્મનિર્વાપી ।
ગુરુવદનમલયનિસૃતો વચનસરસચન્દનસ્પર્શઃ ॥૭૦॥
દુષ્પ્રતિકારૌ માતાપિતરૌ સ્વામી ગુરુશ્ચ લોકેઽસ્મિન્ ।
તત્ર ગુરુરિહામુત્ર ચ સુદુષ્કરતરપ્રતીકારઃ ॥૭૧॥
વિનયફલં શુશ્રૂષા ગુરુશુશ્રૂષાફલં શ્રુતજ્ઞાનમ્ ।
જ્ઞાનસ્ય ફલં વિરતિર્વિરતિફલં ચાશ્રવનિરોધઃ ॥૭૨॥
સંવરફલં તપોબલમથ તપસો નિર્જરાફલં દૃષ્ટમ્ ।
તસ્માત્ક્રિયાનિવૃત્તિઃ ક્રિયાનિવૃત્તેરયોગિત્વમ્ ॥૭૩॥
યોગનિરોધાદ્ભવસન્તતિક્ષયઃ સન્તતિક્ષયાન્મોક્ષઃ ।
તસ્માત્કલ્યાણાનાં સર્વેષાં ભાજનં વિનયઃ ॥૭૪॥
વિનયવ્યપેતમનસો ગુરુવિદ્વત્સાધુપરિભવનશીલાઃ ।
ત્રુટિમાત્રવિષયસઙ્ગાદજરામરવન્નિરુદ્વિગ્નાઃ ॥૭૫॥
કેચિત્સાતર્દ્ધિરસાતિગૌરવાત્સામ્પ્રતેક્ષિણઃ પુરુષાઃ ।
મોહાત્સમુદ્રવાયસવદામિષપરા વિનશ્યન્તિ ॥૭૬॥
તે જાત્યહેતુદૃષ્ટાન્તસિદ્ધમવિરુદ્ધમજરમભયકરમ્ ।
સર્વજ્ઞવાગ્રસાયનમુપનીતં નાભિનન્દન્તિ ॥૭૭॥
યદ્વત્કશ્ચિત્ ક્ષીરં મધુશર્કરયા સુસંસ્કૃતં હૃદ્યમ્ ।
પિત્તાર્દિતેન્દ્રિયત્વાદ્વિતથમતિર્મન્યતે કટુકમ્ ॥૭૮॥
તદ્વન્નિશ્ચયમધુરમનુકમ્પયા સદ્ભિરભિહિતં પથ્યમ્ ।
તથ્યમવમન્યમાના રાગદ્વેષોદયોદ્વૃત્તાઃ ॥૭૯॥

જાતિકુલરૂપબલલાભબુદ્ધિવાલ્લભ્યકશ્રુતમદાન્ધાઃ ।
ક્લીબાઃ પરત્ર ચેહ ચ હિતમપ્યર્થં ન પશ્યન્તિ ॥૮૦॥
જ્ઞાત્વા ભવપરિવર્તે જાતીનાં કોટિશતસહસ્ત્રેષુ ।
હીનોત્તમમધ્યત્વં કો જાતિમદં બુધઃ કુર્યાત્ ॥૮૧॥
નૈકાઞ્જાતિવિશેષાનિન્દ્રિયનિર્વૃત્તિપૂર્વકાન્સત્ત્વાઃ ।
કર્મવશાદ્ગચ્છન્ત્યત્ર કસ્ય કા શાશ્વતી જાતિઃ ॥૮૨॥
રુપબલશ્રુતમતિશીલવિભવપરિવર્જિતાંસ્તથા દૃષ્ટ્વા ।
વિપુલકુલોત્પન્નાનપિ નનુ કુલમાનઃ પરિત્યાજ્યઃ ॥૮૩॥
યસ્યાશુદ્ધં શીલં પ્રયોજનં તસ્ય કિં કુલમદેન ।
સ્વગુણાભ્યલઙ્કૃતસ્ય હિ કિં શીલવતઃ કુલમદેન ॥૮૪॥
કઃ શુક્રશોણિતસમુદ્ભવસ્ય સતતં ચયાપચયિકસ્ય ।
રોગજરાપાશ્રયિણો મદાવકાશોઽસ્તિ રુપસ્ય ॥૮૫॥
નિત્યં પરિશીલનીયે ત્વઙ્માંસાચ્છાદિતે કલુષપૂર્ણે ।
નિશ્ચયવિનાશધર્મિણિ રુપે મદકારણં કિં સ્યાત્ ॥૮૬॥
બલસમુદિતોઽપિ યસ્માન્નરઃ ક્ષણેન વિબલત્વમુપયાતિ ।
બલહીનોઽપિ ચ બલવાન્ સંસ્કારવશાત્પુનર્ભવતિ ॥૮૭॥
તસ્માદનિયતભાવં બલસ્ય સમ્યગ્વિભાવ્ય બુદ્ધિબલાત્ ।
મૃત્યુબલે ચાબલતાં મદં ન કુર્યાદ્બલેનાપિ ॥૮૮॥
ઉદયોપશમનિમિત્તૌ લાભાલાભાવનિત્યકૌ મત્વા ।
નાલાભે વૈક્લવ્યં ન ચ લાભે વિસ્મયઃ કાર્યઃ ॥૮૯॥
પરશક્ત્યભિપ્રસાદાત્મકેન કિઞ્ચિદુપભોગયોગ્યેન ।
વિપુલેનાપિ યતિવૃષા લાભેન મદં ન ગચ્છન્તિ ॥૯૦॥
ગ્રહણોદ્ગ્રાહણનવકૃતિવિચારણાર્થાવધારણાદ્યેષુ ।
બુદ્ધ્યઙ્ગવિધિવિકલ્પેષ્વનન્તપર્યાયવૃદ્ધેષુ ॥૯૧॥
પૂર્વપુરુષસિંહાનાં વિજ્ઞાનાતિશયસાગરાનન્ત્યમ્ ।
શ્રુત્વા સામ્પ્રતપુરુષાઃ કથં સ્વબુદ્ધ્યા મદં યાન્તિ ॥૯૨॥
દ્રમકૈરિવ ચાટુકર્મકમુપકારનિમિત્તકં પરજનસ્ય ।
કૃત્વા યદ્બાલ્લભ્યકમવાપ્યતે કો મદસ્તેન ॥૯૩॥
ગર્વં પરપ્રસાદાત્મકેન વાલ્લભ્યકેન યઃ કુર્યાત્ ।
તં વાલ્લભ્યકવિગમે શોકસમુદયઃ પરામૃશતિ ॥૯૪॥
માષતુષોપાખ્યાનં શ્રુતપર્યાયપ્રરુપણાં ચૈવ ।
શ્રુત્વાતિવિસ્મયકરં ચ વિકરણં સ્થૂલભદ્રમુનેઃ ॥૯૫॥
સમ્પર્કોદ્યમસુલભં ચરણકરણસાધકં શ્રુતજ્ઞાનમ્ ।
લબ્ધ્વા સર્વં મદહરં તેનૈવ મદઃ કથં કાર્યઃ ॥૯૬॥
એતેષુ મદસ્થાનેષુ નિશ્ચયે ન ચ ગુણોઽસ્તિ કશ્ચિદપિ ।
કેવલમુન્માદઃ સ્વહૃદયસ્ય સંસારવૃદ્ધિશ્ચ ॥૯૭॥
જાત્યાદિમદોન્મત્તઃ પિશાચવદ્ભવતિ દુઃખિતશ્ચેહ ।
જાત્યાદિહીનતાં પરભવે ચ નિઃસંશયં લભતે ॥૯૮॥
સર્વમદસ્થાનાનાં મૂલોદ્ઘાતાર્થિના સદા યતિના ।
આત્મગુણૈરુત્કર્ષઃ પરપરિવાદશ્ચ સન્ત્યાજ્યઃ ॥૯૯॥

પરપરિભવપરિવાદાદાત્મોત્કર્ષાચ્ચ બધ્યતે કર્મ ।
નીચૈર્ગોત્રં પ્રતિભવમનેકભવકોટિદુર્મોચમ્ ॥૧૦૦॥
કર્મોદયનિર્વૃત્તં હીનોત્તમમધ્યમં મનુષ્યાણામ્ ।
તદ્વિધમેવ તિરશ્ચાં યોનિવિશેષાન્તરવિભક્તમ્ ॥૧૦૧॥
દેશકુલદેહવિજ્ઞાનાયુર્બલભોગભૂતિવૈષમ્યમ્।
દૃષ્ટ્વા કથમિહ વિદુષાં ભવસંસારે રતિર્ભવતિ ॥૧૦૨॥
અપરિગણિતગુણદોષઃ સ્વપરોભયબાધકો ભવતિ યસ્માત્।
પઞ્ચેન્દ્રિયબલવિબલો રાગદ્વેષોદયનિબદ્ધઃ ॥૧૦૩॥
તસ્માદ્રાગદ્વેષત્યાગે પઞ્ચેન્દ્રિયપ્રશમને ચ।
શુભપરિણામાવસ્થિતિહેતોર્યત્નેન ઘટિતવ્યમ્ ॥૧૦૪॥
તત્કથમનિષ્ટવિષયાભિકાઙ્ક્ષિણા ભોગિના વિયોગો વૈ।
સુવ્યાકુલહૃયેનાપિ નિશ્ચયેનાગમઃ કાર્યઃ ॥૧૦૫॥
આદાવત્યભ્યુદયા મધ્યે શૃઙ્ગારહાસ્યદીપ્તરસાઃ।
નિકષે વિષયાં બીભત્સકરુણલજ્જાભયપ્રાયાઃ ॥૧૦૬॥
યદ્યપિ નિષેવ્યમાણા મનસઃ પરિતુષ્ટિકારકા વિષયાઃ।
કિંપાકફલાદનવદ્ ભવન્તિ પશ્ચાદતિદુરન્તાઃ ॥૧૦૭॥
યદ્વચ્છાકાષ્ટાદશમન્નં બહુભક્ષ્યપેયવત્સ્વાદુ।
વિષસંયુક્તં ભુક્તં વિપાકકાલે વિનાશયતિ ॥૧૦૮॥
તદ્વદુપચારસમ્ભૃતરમ્યકરાગરસસેવિતા વિષયાઃ।
ભવશતપરમ્પરાસ્વપિ દુઃખવિપાકાનુબન્ધકરાઃ ॥૧૦૯॥
અપિ પશ્યતાં સમક્ષં નિયતમનિયતં પદે પદે મરણમ્।
યેષાં વિષયેષુ રતિર્ભવતિ ન તાન્માનુષાન્ ગણયેત્ ॥૧૧૦॥
વિષયપરિણામનિયમો મનોઽનુકૂલવિષયેષ્વનુપ્રેક્ષ્ય।
દ્વિગુણોઽપિ ચ નિત્યમનુગ્રોઽનવદ્યશ્ચ સઞ્ચિન્ત્યઃ ॥૧૧૧॥
ઇતિ ગુણદોષવિપર્યાસદર્શનાદ્વિષયમૂર્ચ્છિતો હ્યાત્મા।
ભવપરિવર્તનભિરુભિરાચારમવેક્ષ્યઃ પરિરક્ષ્યઃ ॥૧૧૨॥
સમ્યક્ત્વજ્ઞાનચારિત્રતપોવીર્યાત્મકો જિનૈઃ પ્રોક્તઃ।
પઞ્ચવિધોઽયં વિધિવત્સાધ્વાચારઃ સમનુગમ્યઃ ॥૧૧૩॥
ષડ્જીવકાયયતના લૌકિકસન્તાનગૌરવત્યાગઃ।
શીતોષ્ણાદિપરીષહવિજયઃ સમ્યક્ત્વમવિકમ્પ્યમ્ ॥૧૧૪॥
સંસારાદુદ્વેગઃ ક્ષપણોપાયશ્ચ કર્મણાં નિપુણઃ।
વૈયાવૃત્ત્યોદ્યોગઃ તપોવિધિર્યોષિતાં ત્યાગઃ ॥૧૧૫॥
વિધિના ભૈક્ષ્યગ્રહણં સ્ત્રીપશુપણ્ડકવિવર્જિતા શય્યા।
ઈર્યાભાષામ્બરભાજનૈષણાવગ્રહાઃ શુદ્ધાઃ ॥૧૧૬॥
સ્થાનનિષદ્યાવ્યુત્સર્ગશબ્દરુપક્રિયાઃ પરાન્યોઽન્યા।
પઞ્ચમહાવ્રતદાઢર્યં વિમુક્તતા સર્વસઙ્ગેભ્યઃ ॥૧૧૭॥
સાધ્વાચારઃ ખલ્વયમષ્ટાદશપદસહસ્રપરિપઠિતઃ।
સમ્યગનુપાલ્યમાનો રાગાદીન્મૂલતો હન્તિ ॥૧૧૮॥
આચારાધ્યયનોક્તાર્થભાવનાચરણગુપ્તહૃદયસ્ય।
ન તદસ્તિ કાલવિવરં યત્ર ક્વચનાભિભવનં સ્યાત્ ॥૧૧૯॥

પૈશાચિકમાખ્યાનં શ્રુત્વા ગોપાયનં ચ કુલવધ્વાઃ।
સંયમયોગૈરાત્મા નિરન્તરં વ્યાપૃતઃ કાર્યઃ ॥૧૨૦॥
ક્ષણવિપરિણામધર્મા મર્ત્યાનામૃદ્ધિસમુદયાઃ સર્વે।
સર્વે ચ શોકજનકાઃ સંયોગા વિપ્રયોગાન્તાઃ ॥૧૨૧॥
ભોગસુખૈઃ કિમનિત્યૈર્ભયબહુલૈઃ કાઙ્ક્ષિતૈઃ પરાયત્તૈઃ।
નિત્યમભયમાત્મસ્થં પ્રશમસુખં તત્ર યતિતવ્યમ્ ॥૧૨૨॥
યાવત્સ્વવિષયલિપ્સોરઽક્ષસમૂહસ્ય ચેષ્ટ્યતે તુષ્ટૌ।
તાવત્તસ્યૈવ જયે વરતરમશઠં કૃતો યત્નઃ ॥૧૨૩॥
યત્સર્વવિષયકાઙ્ક્ષોદ્ભવં સુખં પ્રાપ્યતે સરાગેણ।
તદનન્તકોટિગુણિતં મુધૈવ લભતે વિગતરાગઃ ॥૧૨૪॥
ઇષ્ટવિયોગાપ્રિયસમ્પ્રયોગકાઙ્ક્ષાસમુદ્ભવં દુઃખમ્।
પ્રાપ્નોતિ યત્સરાગો ન સંસ્પૃશતિ તદ્વિગતરાગઃ ॥૧૨૫॥
પ્રશમિતવેદકષાયસ્ય હાસ્યરત્યરતિશોકનિભૃતસ્ય।
ભયકુત્સાનિરભિભવસ્ય યત્સુખં તત્કુતોઽન્યેષામ્ ॥૧૨૬॥
સમ્યગ્દૃષ્ટિર્જ્ઞાની ધ્યાનતપોબલયુતોઽપ્યનુપશાન્તઃ।
તં લભતે ન ગુણં યં પ્રશમગુણમુપાસિતો લભતે ॥૧૨૭॥
નૈવાસ્તિ રાજરાજસ્ય તત્સુખં નૈવ દેવરાજસ્ય।
યત્સુખમિહૈવ સાધોર્લોકવ્યાપારરહિતસ્ય ॥૧૨૮॥
સન્ત્યજ્ય લોકચિન્તામાત્મપરિજ્ઞાનચિન્તનેઽભિરતઃ।
જિતલોભરોષમદનઃ સુખમાસ્તે નિર્જરઃ સાધુઃ ॥૧૨૯॥
યા ચેહ લોકવાર્તા શરીરવાર્ત્તા તપસ્વિનાં યા ચ।
સદ્ધર્મચરણવાર્ત્તાનિમિત્તકં તદ્દ્વયમપીષ્ટમ્ ॥૧૩૦॥
લોકઃ ખલ્વાધારઃ સર્વેષાં બ્રહ્મચારિણાં યસ્માત્।
તસ્માલ્લોકવિરુદ્ધં ધર્મવિરુદ્ધં ચ સન્ત્યાજ્યમ્ ॥૧૩૧॥
દેહો નાસાધનકો લોકાધિનાનિ સાધનાન્યસ્ય।
સદ્ધર્માનુપરોધાત્તસ્માલ્લોકોઽભિગમનીયઃ ॥૧૩૨॥
દોષેણાનુપકારી ભવતિ પરો યેન યેન વિદ્વિષ્ટઃ।
સ્વયમપિ તદ્દોષપદં સદા પ્રયત્નેન પરિહાર્યમ્ ॥૧૩૩॥
પિણ્ડૈષણાનિરુક્તઃ કલ્પ્યાકલ્પ્યસ્ય યો વિધિઃ સૂત્રે।
ગ્રહણોપભોગનિયતસ્ય તેન નૈવાઽઽમયભયં સ્યાત્ ॥૧૩૪॥
વ્રણલેપાક્ષોપાઙ્ગવદસઙ્ગયોગભરમાત્રયાત્રાર્થમ્।
પન્નગ ઇવાભ્યવહરેદાહારં પુત્રપલવચ્ચ ॥૧૩૫॥
ગુણવદમૂર્છિતમનસા તદ્વિપરીતમપિ ચાપ્રદુષ્ટેન।
દારુપમધૃતિર્ભવાત કલ્પ્યમાસ્વાદ્યમાસ્વાદ્યમ્ ॥૧૩૬॥
કાલં ક્ષેત્રં માત્રાં સાત્મ્યં દ્રવ્યગુરુલાઘવં સ્વબલમ્।
જ્ઞાત્વા યોઽભ્યવહાર્યં ભુઙ્ક્તે કિં ભેષજૈસ્તસ્ય ॥૧૩૭॥
પિણ્ડઃ શય્યા વસ્ત્રૈષણાદિ પાત્રૈષણાદિ યચ્ચાન્યત્।
કલ્પ્યાકલ્પ્યં સદ્ધર્મદેહરક્ષાનિમિત્તોત્કમ્ ॥૧૩૮॥
કલ્પ્યાકલ્પ્યવિધિજ્ઞઃ સંવિગ્નસહાયકો વિનીતાત્મા।
દોષમલિનેઽપિ લોકે પ્રવિહરતિ મુનિર્નિરુપલેપઃ ॥૧૩૯॥

JainUniversity.org

યદ્વત્પઙ્કાધારમપિ પઙ્કજં નોપલિપ્યતે તેન।
ધર્મોપકરણધૃતવપુરપિ સાધુરલેપકસ્તદ્વત્ ॥૧૪૦॥
યદ્વત્તુરગઃ સત્સ્વપ્યાભરણવિભૂષણેષ્વનભિષત્કઃ।
તદ્વદુપગ્રહવાનપિ ન સઙ્ગમુપયાતિ નિર્ગ્રન્થઃ ॥૧૪૧॥
ગ્રન્થઃ કર્માષ્ટવિધં મિથ્યાત્વાવિરતિદુષ્ટયોગાશ્ચ।
તજ્જયહેતોરશઠં સંયતતે યઃ સ નિર્ગ્રન્થઃ ॥૧૪૨॥
યજ્જ્ઞાનશીલતપસામુપગ્રહં નિગ્રહં ચ દોષાણામ્।
કલ્પયતિ નિશ્ચયે યત્તત્કલ્પ્યમકલ્પ્યમવશેષમ્ (-શિષ્ટમ્?) ॥૧૪૩॥
યત્પુનરુપઘાતકરં સમ્યક્ત્વજ્ઞાનશીલયોગાનામ્।
તત્કલ્પ્યમપ્યકલ્પ્યં પ્રવચનકુત્સાકરં યચ્ચ ॥૧૪૪॥
કિઞ્ચિચ્છુદ્ધં કલ્પ્યમકલ્પ્યં સ્યાત્સ્યાદકલ્પ્યમપિ કલ્પ્યમ્।
પિણ્ડઃ શય્યા વસ્ત્રં પાત્રં વા ભેષજાદ્યં વા ॥૧૪૫॥
દેશં કાલં પુરુષમવસ્થામુપયોગશુદ્ધપરિણામાન્।
પ્રસમીક્ષ્ય ભવતિ કલ્પ્યં નૈકાન્તાત્કલ્પતે કલ્પ્યમ્ ॥૧૪૬॥
તચ્ચિન્ત્યં તદ્ભાષ્યં તત્કાર્યં ભવતિ સર્વથા યતિના।
નાત્મપરોભયબાધકમિહ યત્પરતશ્ચ સર્વાદ્ધમ્ ॥૧૪૭॥
સવાર્થેષ્વિન્દ્રિયસઙ્ગતેષુ વૈરાગ્યમાર્ગવિઘ્નેષુ।
પરિસઙ્ખ્યાનં કાર્યં કાર્યં પરમિચ્છતા નિયતમ્ ॥૧૪૮॥
ભાવયિતવ્યમઽનિત્યત્વમશરણત્વં તથૈકતાઽન્યત્વે।
અશુચિત્વં સંસારઃ કર્માસ્રવસંવરવિધિશ્ચ ॥૧૪૯॥
નિર્જરણલોકવિસ્તરધર્મસ્વાખ્યાતતત્ત્વચિન્તાશ્ચ।
બોધેઃ સુદુર્લભત્વં ચ ભાવની દ્વાદશ વિશુદ્ધાઃ ॥૧૫૦॥
ઇષ્ટજનસંપ્રયોગર્દ્ધિવિષયસુખસંપદસ્તથારોગ્યમ્।
દેહશ્ચ યૌવનં જીવિતં ચ સર્વાણ્યનિત્યાનિ ॥૧૫૧॥
જન્મજરામરણભયૈરભિદ્રુતે વ્યાધિવેદનાગ્રસ્તે।
જિનવરવચનાદન્યત્ર નાસ્તિ શરણં ક્વચિલ્લોકે ॥૧૫૨॥
એકસ્ય જન્મમરણે ગતયશ્ચ શુભાશુભા ભવાવર્તે।
તસ્માદાકાલિકહિતમેકેનૈવાત્મનઃ કાર્યમ્ ॥૧૫૩॥
અન્યોઽહં સ્વજનાત્પરિજનાચ્ચ વિભવાચ્છરીરકાચ્ચેતિ।
યસ્ય નિયતા મતિરિયં ન બાધતે તં હિ શોકકલિઃ ॥૧૫૪॥
અશુચિકરણસામર્થ્યાદાદ્યુત્તરકારણાશુચિત્વાચ્ચ।
દેહસ્યાશુચિભાવઃ સ્થાને સ્થાને ભવતિ ચિન્ત્યઃ ॥૧૫૫॥
માતા ભૂત્વા દુહિતા ભગિની ભાર્યા ચ ભવતિ સંસારે।
વ્રજતિ સુતઃ પિતૃતાં ભ્રાતૃતાં પુનઃ શત્રુતાં ચૈવ ॥૧૫૬॥
મિથ્યાદૃષ્ટિરવિરતઃ પ્રમાદવાન્ યઃ કષાયદણ્ડરુચિઃ।
તસ્ય તથાશ્રવકર્મણિ યતેત તન્નિગ્રહે તસ્માત્ ॥૧૫૭॥
યા પુણ્યપાપયોરગ્રહણે વાક્કાયમાનસી વૃત્તિઃ।
સુસમાહિતો હિતઃ સંવરો વરદદેશિતશ્ચિન્ત્યઃ ॥૧૫૮॥
યદ્વદ્વિશોષણાદુપચિતોઽપિ યત્નેન જીર્યતે દોષઃ।
તદ્વત્કર્મોપચિતં નિર્જરયતિ સંવૃતસ્તપસા ॥૧૫૯॥

jainuniversity.org
સર્વજ્ઞાનાય ભવતુ

લોકસ્યાધસ્તિર્યગ્વિચિન્તયેદૂર્ધ્વમપિ ચ બાહલ્યમ્।
સર્વત્ર જન્મમરણે રુપિદ્રવ્યોપયોગાંશ્ચ ॥૧૬૦॥
ધર્મોઽયં સ્વાખ્યાતો જગદ્ધિતાર્થં જિનૈર્જિતારિગણૈઃ।
યેઽત્ર રતાસ્તે સંસારસાગરં લીલયોત્તીર્ણાઃ ॥૧૬૧॥
માનુષ્યકર્મભૂમ્યાર્યદેશકુલકલ્પતાયુરુપલબ્ધૌ।
શ્રદ્ધાકથકશ્રવણેષુ સત્સ્વપિ સુદુર્લભા બોધિઃ ॥૧૬૨॥
તાં દુર્લભાં ભવશતૈર્લબ્ધ્વાઽપ્યતિદુર્લભા પુનર્વિરતિઃ।
મોહાદ્રાગાત્કાપથવિલોકનાદ્ગૌરવવશાચ્ચ ॥૧૬૩॥
તત્પ્રાપ્ય વિરતિરત્નં વિરાગમાર્ગવિજયો દુરધિગમ્યઃ।
ઇન્દ્રિયકષાયગૌરવપરીષહસપત્નવિધુરેણ ॥૧૬૪॥
તસ્માત્પરીષહેન્દ્રિયગૌરવગણનાયકાન્કષાયરિપૂન્।
ક્ષાન્તિબલમાર્દવાર્જવસન્તોષૈઃ સાધયેદ્ધીરઃ ॥૧૬૫॥
સઞ્ચિન્ત્ય કષાયાણામુદયનિમિત્તમુપશાન્તિહેતું ચ।
ત્રિકરણશુદ્ધમપિ તયોઃ પરિહારસેવને કાર્યે ॥૧૬૬॥
સેવ્યઃ ક્ષાન્તિર્માર્દવમાર્જવશૌચે ચ સંયમત્યાગૌ।
સત્યતપો બ્રહ્માકિઞ્ચન્યાનીત્યેષ ધર્મવિધિઃ ॥૧૬૭॥
ધર્મસ્ય દયા મૂલં ન ચાક્ષમાવાન્ દયાં સમાદત્તે।
તસ્માદ્યઃ ક્ષાન્તિપરઃ સ સાધયત્યુત્તમં ધર્મમ્ ॥૧૬૮॥
વિનયાયત્તાશ્ચ ગુણાઃ સર્વે વિનયશ્ચ માર્દવાયત્તઃ।
યસ્મિન્માર્દવમખિલં સ સર્વગુણભાક્ત્વમાપ્નોતિ ॥૧૬૯॥
નાઽનાર્જવો વિશુધ્યતિ ન ધર્મમારાધયત્યશુદ્ધાત્મા।
ધર્માદૃતે ન મોક્ષો મોક્ષાત્પરમં સુખં નાન્યત્ ॥૧૭૦॥
યદ્રવ્યોપકરણભક્તપાનદેહાધિકારકં શૌચમ્।
તદ્ભવતિ ભાવશૌચાનુપરોધાદ્યત્નતઃ કાર્યમ્ ॥૧૭૧॥
પઞ્ચાસ્રવાદ્વિરમણં પઞ્ચેન્દ્રિયનિગ્રહઃ કષાયજયઃ।
દણ્ડત્રયવિરતિશ્ચેતિ સંયમઃ સપ્તદશભેદઃ ॥૧૭૨॥
બાન્ધવધનેન્દ્રિયસુખત્યાગત્ત્યક્તભયવિગ્રહઃ સાધુઃ।
ત્યક્તાત્મા નિર્ગ્રન્થસ્ત્યક્તાહઙ્કારમમકારઃ ॥૧૭૩॥
અવિસંવાદનયોગઃ કાયમનોવા ગજિહ્મતા ચૈવ।
સત્યં ચતુર્વિધં તચ્ચ જિનવરમતેઽસ્તિ નાન્યત્ર ॥૧૭૪॥
અનશનમૂનોદરતા વૃત્તેઃ સંક્ષેપણં રસત્યાગઃ।
કાયક્લેશઃ સંલીનતેતિ બાહ્યં તપઃ પ્રોક્તમ્ ॥૧૭૫॥
પ્રાયશ્ચિત્તધ્યાને વૈયાવૃત્ત્યવિનયાવથોત્સર્ગઃ।
સ્વાધ્યાય ઇતિ તપઃ ષટ્પ્રકારમાભ્યતરં ભવતિ ॥૧૭૬॥
દિવ્યાત્કામરતિસુખાત્ત્રિવિધં ત્રિવિધેન વિરતિરિતિ નવકં।
ઔદારિકાદપિ તથા તદ્ બ્રહ્માષ્ટાદશવિકલ્પમ્ ॥૧૭૭॥
અધ્યાત્મવિદો મૂર્ચ્છાં પરિગ્રહં વર્ણયન્તિ નિશ્ચયતઃ।
તસ્માદ્વૈરાગ્યેપ્સોરાકિઞ્ચન્યં પરો ધર્મઃ ॥૧૭૮॥
દશવિધધર્માનુષ્ઠાયિનઃ સદા રાગદ્વેષમોહાનામ્।
દૃઢરૂઢઘનાનામપિ ભવત્યુપશમોઽલ્પકાલેન ॥૧૭૯॥

jainuniversity.org
સર્વજ્ઞાનાય ભવતુ

મમકારાહઙ્કારત્યાગાદતિદુર્જયોદ્ધતપ્રબલાન્।
હન્તિ પરીષહગૌરવકષાયદણ્ડેન્દ્રિયવ્યૂહાન્ ॥૧૮૦॥
પ્રવચનભક્તિઃ શ્રુતસમ્પદુદ્યમો વ્યતિકરશ્ચ સંવિગ્નૈઃ।
વૈરાગ્યમાર્ગસદ્ભાવભાવધીસ્થૈર્યજનકાનિ ॥૧૮૧॥
આક્ષેપણીં વિક્ષેપણીં વિમાર્ગબાધનસમર્થવિન્યાસાં।
શ્રોતૃજનશ્રોત્રમનઃપ્રસાદજનનીં યથા જનનીમ્ ॥૧૮૨॥
સંવેદનીં ચ નિર્વેદનીં ચ ધર્મ્યાં કથાં સદા કુર્યાત્।
સ્ત્રીભક્તચૌરજનપદકથાશ્ચ દૂરાત્પરિત્યાજ્યાઃ ॥૧૮૩॥
યાવત્પરગુણદોષપરિકીર્તને વ્યાપૃતં મનો ભવતિ।
તાવદ્વરં વિશુદ્ધે ધ્યાને વ્યગ્રં મનઃ કર્તુમ્ ॥૧૮૪॥
શાસ્ત્રાધ્યયને ચાધ્યાપને ચ સઞ્ચિન્તને તથાત્મનિ ચ।
ધર્મકથને ચ સતતં યત્નઃ સર્વાત્મના કાર્યઃ ॥૧૮૫॥
શાસ્વિતિ વાગ્વિધિવિદ્ભિર્ધાતુઃ પાપઠ્યતેઽનુશિષ્ટ્યર્થઃ।
ત્રૈઙિતિ ચ પાલનાર્થે વિનિશ્ચિતઃ સર્વશબ્દવિદામ્ ॥૧૮૬॥
યસ્મારાગદ્વેષોદ્ધતચિત્તાન્ સમનુશાસ્તિ સદ્ધર્મે।
સન્ત્રાયતે ચ દુઃખાચ્છાસ્ત્રમિતિ નિરુચ્યતે સદ્ભિઃ ॥૧૮૭॥
શાસનસામર્થ્યેન તુ સન્ત્રાણબલેન ચાનવદ્યેન।
યુક્તં યત્તચ્છાસ્ત્રં તચ્ચૈતત્સર્વવિદ્વચનમ્ ॥૧૮૮॥
જીવાઽજીવાઃ પુણ્યં પાપાસ્રવસંવરાઃ સનિર્જરણાઃ।
બન્ધો મોક્ષશ્ચૈતે સમ્યક્ ચિન્ત્યા નવ પદાર્થાઃ ॥૧૮૯॥
જીવા મુક્તાઃ સંસારિણશ્ચ સંસારિણસ્ત્વનેકવિધાઃ।
લક્ષણતો વિજ્ઞેયા દ્વિત્રિચતુઃપઞ્ચષટ્ભેદાઃ ॥૧૯૦॥
દ્વિવિધાશ્ચરાચરાખ્યાસ્ત્રિવિધાઃ સ્ત્રીપુંનપુંસકા જ્ઞેયાઃ।
નારકતિર્યગ્માનુષદેવાશ્ચતુર્વિધાઃ પ્રોક્તાઃ ॥૧૯૧॥
પઞ્ચવિધાસ્ત્વેકદ્વિત્રિચતુઃપઞ્ચેન્દ્રિયાસ્તુ નિર્દિષ્ટાઃ।
ક્ષિત્યમ્બુવહ્નિપવનતરવસ્ત્રસાશ્ચેતિ ષટ્ભેદાઃ ॥૧૯૨॥
એવમનેકવિધાનામેકૈકો વિધિરનન્તપર્યાયઃ।
પ્રોક્તઃ સ્થિત્યવગાહજ્ઞાનદર્શનાદિપર્યાયૈઃ ॥૧૯૩॥
સામાન્યં ખલુ લક્ષણમુપયોગો ભવતિ સર્વજીવાનામ્।
સાકારોઽનાકારશ્ચ સોઽષ્ટભેદશ્ચતુર્ધા ચ ॥૧૯૪॥
જ્ઞાનાજ્ઞાને પઞ્ચત્રિવિકલ્પે સોઽષ્ટધા તુ સાકારઃ।
ચક્ષુરચક્ષુરવધિકેવલદૃગ્વિષયસ્ત્વનાકારઃ ॥૧૯૫॥
ભાવા ભવન્તિ જીવસ્યૌદયિકઃ પારિણામિકશ્ચૈવ।
ઔપશમિકઃ ક્ષયોત્થઃ ક્ષયોપશમજશ્ચ પઞ્ચૈતે ॥૧૯૬॥
તે ચૈકવિંશતિત્રિદ્વિનવાષ્ટાદશવિધાશ્ચ વિજ્ઞેયાઃ।
ષષ્ઠશ્ચ સાન્નિપાતિક ઇત્યન્યઃ પઞ્ચદશભેદઃ ॥૧૯૭॥
એભિર્ભાવૈઃ સ્થાનં ગતિમિન્દ્રિયસંપદઃ સુખં દુઃખમ્।
સમ્પ્રાપ્નોતીત્યાત્મા સોઽષ્ટવિકલ્પઃ સમાસેન ॥૧૯૮॥
દ્રવ્યં કષાયયોગા-વુપયોગો જ્ઞાનદર્શને ચેતિ।
ચારિત્રં વીર્યં ચે-ત્યષ્ટવિધા માર્ગણા તસ્ય ॥૧૯૯॥

jainuniversity.org
सर्वे ज्ञानाय भवतु

જીવાજીવાનાં દ્રવ્યાત્મા સકષાયિણાં કષાયાત્મા।
યોગઃ સયોગિનાં પુનરુપયોગઃ સર્વજીવાનામ્ ॥૨૦૦॥
જ્ઞાનં સમ્યગ્દૃષ્ટેર્દર્શનમથ ભવતિ સર્વજીવાનામ્।
ચારિત્રં વિરતાનાં તુ સર્વસંસારિણાં વીર્યમ્ ॥૨૦૧॥
દ્રવ્યાત્મેત્યુપચારઃ સર્વદ્રવ્યેષુ નયવિશેષેણ।
આત્માદેશાદાત્મા ભવત્યનાત્મા પરાદેશાત્ ॥૨૦૨॥
એવં સંયોગાલ્પબહુત્વાદ્યૈર્નૈકશઃ સ પરિમૃગ્યઃ।
જીવસ્યૈતત્સર્વં સ્વતત્ત્વમિહ લક્ષણૈર્દૃષ્ટમ્ ॥૨૦૩॥
ઉત્પાદવિગમનિત્યત્વલક્ષણં યત્તદસ્તિ સર્વમપિ।
સદસદ્વા ભવતીત્યન્યથાર્પિતાનર્પિતવિશેષાત્ ॥૨૦૪॥
યોઽર્થો યસ્મિન્નાભૂત્ સામ્પ્રતકાલે ચ દૃશ્યતે તત્ર।
તેનોત્પાદસ્તસ્ય વિગમસ્તુ તસ્માદ્વિપર્યાસઃ ॥૨૦૫॥
સામ્પ્રતકાલે ચાનાગતે ચ યો યસ્ય ભવતિ સમ્બન્ધી।
તેનાવિગમસ્તસ્યેતિ સ નિત્યસ્તેન ભાવેન ॥૨૦૬॥
ધર્માધર્માકાશાનિ પુદ્ગલાઃ કાલ એવ ચાઽજીવાઃ।
પુદ્ગલવર્જમરુપં તુ રૂપિણઃ પુદ્ગલા પ્રોક્તાઃ ॥૨૦૭॥
દ્વ્યાદિપ્રદેશવન્તો યાવદનન્તપ્રદેશિકાઃ સ્કન્ધાઃ।
પરમાણુરપ્રદેશો વર્ણાદિગુણેષુ ભજનીયઃ ॥૨૦૮॥
ભાવે ધર્માધર્મામ્બરકાલાઃ પારિણામિકે જ્ઞેયાઃ।
ઉદયપરિણામિ રૂપં તુ સર્વભાવાનુગા જીવાઃ ॥૨૦૯॥
જીવાજીવા દ્રવ્યમિતિ ષડ્વિધં ભવતિ લોકપુરુષોઽયમ્।
વૈશાખસ્થાનસ્થઃ પુરુષ ઇવ કટિસ્થકરયુગ્મઃ ॥૨૧૦॥
તત્રાધોમુખમલ્લકસંસ્થાનં વર્ણયન્ત્યધોલોકમ્।
સ્થાલમિવ ચ તિર્યગ્લોકમૂર્ધ્વમથ મલ્લકસમુદ્ગમ્ ॥૨૧૧॥
સપ્તવિધોઽધોલોકસ્તિર્યગ્લોકો ભવત્યનેકવિધઃ।
પઞ્ચદશવિધાનઃ પુન-રૂર્ધ્વલોકઃ સમાસેન ॥૨૧૨॥
લોકાલોકવ્યાપકમાકાશં મર્ત્યલૌકિકઃ કાલઃ।
લોકવ્યાપિ ચતુષ્ટયમવશેષં ત્વેકજીવો વા ॥૨૧૩॥
ધર્માધર્માકાશાન્યેકૈકમતઃ પરં ત્રિકમનન્તમ્।
કાલં વિનાસ્તિકાયા જીવમૃતે ચાપ્યકર્તૃણિ ॥૨૧૪॥
ધર્મો ગતિસ્થિતિમતાં દ્રવ્યાણાં ગત્યુપગ્રહવિધાતા।
સ્થિત્યુપકર્તાઽધર્મોઽવકાશદાનોપકૃદ્ગગનમ્ ॥૨૧૫॥
સ્પર્શરસગન્ધવર્ણાઃ શબ્દો બન્ધશ્ચ સૂક્ષ્મતા સ્થૌલ્યમ્।
સંસ્થાનં ભેદતમશ્છાયોદ્યોતાતપશ્ચેતિ ॥૨૧૬॥
કર્મશરીરમનોવાગ્વિચેષ્ટિતોચ્છ્વાસદુઃખસુખદાઃ સ્યુઃ।
જીવિતમરણોપગ્રહકરાશ્ચ સંસારિણઃ સ્કન્ધાઃ ॥૨૧૭॥
પરિણામવર્તનાવિધિપરાપરત્વગુણલક્ષણઃ કાલઃ।
સમ્યક્ત્વજ્ઞાનચારિત્ર વીર્યશિક્ષાગુણા જીવાઃ ॥૨૧૮॥
પુદ્ગલકર્મ શુભં યત્તત્પુણ્યમિતિ જિનશાસને દૃષ્ટમ્।
યદશુભમથ તત્પાપમિતિ ભવતિ સર્વજ્ઞનિર્દિષ્ટમ્ ॥૨૧૯॥

યોગઃ શુદ્ધઃ પુણ્યાશ્રવસ્તુ પાપસ્ય તદ્વિપર્યાસઃ।
વાક્કાયમનોગુપ્તિર્નિરાશ્રવઃ સંવરસ્તૂક્તઃ ॥૨૨૦॥
સંવૃતતપઉપધાનાત્તુ નિર્જરા કર્મસન્તતિબન્ધઃ।
બંન્ધવિયોગો મોક્ષસ્ત્વિતિ સંક્ષેપાન્નવપદાર્થાઃ ॥૨૨૧॥
એતેષ્વધ્યવસાયો યોઽર્થેષુ વિનિશ્ચયેન તત્ત્વમિતિ।
સમ્યગ્દર્શનમેતત્તુ તન્નિસર્ગાદધિગમાદ્વા ॥૨૨૨॥
શિક્ષાગમોપદેશશ્રવણાન્યેકાર્થિકાન્યધિગમસ્ય।
એકાર્થઃ પરિણામો ભવતિ નિસર્ગઃ સ્વભાવશ્ચ ॥૨૨૩॥
એતત્સમ્યગ્દર્શનમનધિગમવિપર્યયૌ તુ મિથ્યાત્વમ્।
જ્ઞાનમથ પઞ્ચભેદં તત્પ્રત્યક્ષં પરોક્ષં ચ ॥૨૨૪॥
તત્ર પરોક્ષં દ્વિવિધં શ્રુતમાભિનિબોધિકં ચ વિજ્ઞેયમ્।
પ્રત્યક્ષં ત્વવધિમનઃપર્યાયૌ કેવલં ચેતિ ॥૨૨૫॥
એષામુત્તરભેદવિષયાદિભિર્ભવતિ વિસ્તરાધિગમઃ।
એકાદીન્યેકસ્મિન્ ભાજ્યાનિ ત્વાચતુર્ભ્ય ઇતિ ॥૨૨૬॥
સમ્યગ્દૃષ્ટેર્જ્ઞાનં સમ્યગ્જ્ઞાનમિતિ નિયમતઃ સિદ્ધમ્।
આદ્યત્રયમજ્ઞાનમપિ ભવતિ મિથ્યાત્વસંયુક્તમ્ ॥૨૨૭॥
સામાયિકમિત્યાદ્યં છેદોપસ્થાપનં દ્વિતીયં તુ।
પરિહારવિશુદ્ધિઃ સૂક્ષ્મસમ્પરાયં યથાખ્યાતમ્ ॥૨૨૮॥
ઇત્યેતત્પઞ્ચવિધં ચારિત્રં મોક્ષસાધનં પ્રવરમ્।
નૈકૈરનુયોગનયપ્રમાણમાર્ગૈઃ સમનુગમ્યમ્ ॥૨૨૯॥
સમ્યક્ત્વજ્ઞાચારિત્રસમ્પદઃ સાધનાનિ મોક્ષસ્ય।
તાસ્વેકતરાભાવેઽપિ મોક્ષમાર્ગોઽપ્યસિદ્ધિકરઃ ॥૨૩૦॥
પૂર્વદ્વયસમ્પદ્યપિ તેષાં ભજનીયમુત્તરં ભવતિ।
પૂર્વદ્વયલાભઃ પુનરુત્તરલાભે ભવતિ સિદ્ધઃ ॥૨૩૧॥
ધર્માવશ્યકયોગેષુ ભાવિતાત્મા પ્રમાદપરિવર્જી।
સમ્યક્ત્વજ્ઞાનચારિત્રાણામારાધકો ભવતિ ॥૨૩૨॥
આરાધનાસ્તુ તેષાં તિસ્ત્રસ્તુ જઘન્યમધ્યમોત્કૃષ્ટાઃ।
જન્મભિરષ્ટત્ર્યેકૈઃ સિધ્યન્ત્યારાધકાસ્તાસામ્ ॥૨૩૩॥
તાસામારાધનતત્પરેણ તેષ્વેવ ભવતિ યતિતવ્યમ્।
યતિના તત્પરજિનભક્ત્યુપગ્રહસમાધિકરણેન ॥૨૩૪॥
સ્વગુણાભ્યાસરતમતેઃ પરવૃત્તાન્તાન્ધમૂકબધિરસ્ય।
મદમદનમોહમત્સરરોષવિષાદૈરધૃષ્યસ્ય ॥૨૩૫॥
પ્રશમાવ્યાબાધસુખાભિકાઙ્ક્ષિણઃ સુસ્થિતસ્ય સદ્ધર્મે।
તસ્ય કિમૌપમ્યં સ્યાત્ સદેવમનુજેઽપિ લોકેઽસ્મિન્ ॥૨૩૬॥
સ્વર્ગસુખાનિ પરોક્ષાણ્યત્યન્તપરોક્ષમેવ મોક્ષસુખમ્।
પ્રત્યક્ષં પ્રશમસુખં ન પરવશં ન ચ વ્યયપ્રાપ્તમ્ ॥૨૩૭॥
નિર્જિતમદમદનાનાં વાક્કાયમનોવિકારરહિતાનામ્।
વિનિવૃત્તરાશાનામિહૈવ મોક્ષઃ સુવિહિતાનામ્ ॥૨૩૮॥
શબ્દાદિવિષયપરિણામમનિત્યં દુઃખમેવ ચ જ્ઞાત્વા।
જ્ઞાત્વા ચ રાગદ્વેષાત્મકાનિ દુઃખાનિ સંસારે ॥૨૩૯॥

jainuniversity.org
સદ્ જ્ઞાનાય ભવતુ

સ્વશરીરેऽપિ ન રજ્યતિ શત્રાવપિ ન પ્રદોષમુપયાતિ।
રોગજરામરણભયૈરવ્યથિતો યઃ સ નિત્યસુખી ॥૨૪૦॥
ધર્મધ્યાનાભિરતસ્ત્રિદણ્ડવિરતસ્ત્રિગુપ્તિગુપ્તાત્મા।
સુખમાસ્તે નિર્દ્વંદ્વો જિતેન્દ્રિયપરીષહકષાયઃ ॥૨૪૧॥
વિષયસુખનિરભિલાષઃ પ્રશમગુણગણાભ્યલઙ્કૃતઃ સાધુઃ।
દ્યોતયતિ યથા ન તથા સર્વાણ્યાદિત્યતેજાંસિ ॥૨૪૨॥
(સમ્યગ્દૃષ્ટિર્જ્ઞાની વિરતિતપોબલયુતોऽપ્યનુપશાન્તઃ।
તં ન લભતે ગુણં યં પ્રશમગુણમુપાશ્રિતો લભતે)॥
સમ્યગ્દૃષ્ટિર્જ્ઞાની વિરતિતપોધ્યાનભાવનાયોગૈઃ।
શાલાઙ્ગસહસ્ત્રાષ્ટાદશકમયત્નેન સાધયતિ ॥૨૪૩॥
ધર્માદ્ભૂમ્યાદીન્દ્રિયસંજ્ઞાભ્યઃ કરણતશ્ચ યોગાચ્ચ।
શીલાઙ્ગસહસ્ત્રાણામષ્ટાદશકસ્યાસ્તિ નિષ્પત્તિઃ ॥૨૪૪॥
શીલાર્ણવસ્ય પારં ગત્વા સંવિગ્નસુગમમાર્ગસ્ય।
ધર્મધ્યાનમુપગતો વૈરાગ્યં પ્રાપ્નુયાદ્યોગ્યમ્ ॥૨૪૫॥
આજ્ઞાવિચયમપાયવિચયં ચ સદ્ધ્યાનયોગમુપસૃત્ય।
તસ્માદ્વિપાકવિચયમુપયાતિ સંસ્થાનવિચયં ચ ॥૨૪૬॥
આપ્તવચનં પ્રવચનં ચાજ્ઞાવિચયસ્તદર્થનિર્ણયનમ્।
આશ્રવવિકથાગૌરવપરીષહાદ્યૈરપાયસ્તુ ॥૨૪૭॥
અશુભશુભકર્મવિપાકાનુચિન્તનાર્થો વિપાકવિચયઃસ્યાત્।
દ્રવ્યક્ષેત્રાકૃત્યનુગમનં સંસ્થાનવિચયસ્તુ ॥૨૪૮॥
જિનવરવચનગુણગણં સઞ્ચિન્તયતો વધાદ્યાપાયાંશ્ચ।
કર્મવિપાકાન્ વિવિધાન્ સંસ્થાનવિધીનનેકાંશ્ચ ॥૨૪૯॥
નિત્યોદ્વિગ્નસ્યૈવં ક્ષમાપ્રધાનસ્ય નિરભિમાનસ્ય।
ધુતમાયાકલિમલનિર્મલસ્ય જિતસર્વતૃષ્ણસ્ય ॥૨૫૦॥
તુલ્યારણ્યકુલાકુલવિવિક્તબન્ધુજનશત્રુવર્ગસ્ય।
સમવાસીચન્દનકલ્પનપ્રદેહાદિદેહસ્ય ॥૨૫૧॥
આત્મારામસ્ય સતઃ સમતૃણમણિમુક્તલેષ્ટુકનકસ્ય।
સ્વાધ્યાયધ્યાનપરાયણસ્ય દૃઢમપ્રમત્તસ્ય ॥૨૫૨॥
અધ્યવસાયવિશુદ્ધેઃ પ્રશસ્તયોગૈર્વિશુદ્ધ્યમાનસ્ય।
ચારિત્રશુદ્ધિમગ્ર્યામવાપ્ય લેશ્યાવિશુદ્ધિં ચ ॥૨૫૩॥
તસ્યાપૂર્વકરણમથ ઘાતિકર્મક્ષયૈકદેશાત્થમ્।
ઋદ્ધિપ્રવેકવિભવવદુપજાતં જાતભદ્રસ્ય ॥૨૫૪॥
સાતર્દ્ધિરસેષ્વગુરુઃપ્રાપ્યર્દ્ધિવિભૂતિમસુલભામન્યૈઃ।
સક્તઃ પ્રશમરતિસુખે ન ભજતિ તસ્યાં મુનિઃ સઙ્ગમ્ ॥૨૫૫॥
યા સર્વસુરવરર્દ્ધિવિસ્મયનીયાપિ સાऽનગારર્દ્ધેઃ।
નાર્ઘતિ સહસ્રભાગં કોટિશતસહસ્રગુણિતાપિ ॥૨૫૬॥
તજ્જયમવાપ્ય જિતવિઘ્નરિપુર્ભવશતસહસ્રદુષ્પ્રાપમ્।
ચારિત્રમથાખ્યાતં સંપ્રાપ્તસ્તીર્થકૃત્તુલ્યમ્ ॥૨૫૭॥
શુક્લધ્યાનાદ્યદ્વયમવાપ્ય કર્માષ્ટકપ્રણેતારમ્।
સંસારમૂલબીજં મૂલાદુન્મૂલયતિ મોહમ્ ॥૨૫૮॥

jainuniversity.org

પૂર્વં કરોત્યનન્તાનુબન્ધિનામ્નાં ક્ષયં કષાયાણામ્।
મિથ્યાત્વમોહગહનં ક્ષપયતિ સમ્યક્ત્વમિથ્યાત્વમ્ ॥૨૫૯॥
સમ્યક્ત્વમોહનીયં ક્ષપયત્યષ્ટાવતઃ કષાયાંશ્ચ।
ક્ષયપતિ તતો નપુંસકવેદં સ્ત્રીવેદમથ તસ્માત્ ॥૨૬૦॥
હાસ્યાદિ તતઃ ષટ્કં ક્ષપયતિ તસ્માચ્ચ પુરુષવેદમપિ।
સંજ્વલનાનપિ હત્વા પ્રાપ્નોત્યથ વીતરાગત્વમ્ ॥૨૬૧॥
સર્વોદ્ઘાતિતમોહો નિહતક્લેશો યથા હિ સર્વજ્ઞઃ।
ભાત્યનુપલક્ષ્યરાહ્વંશોન્મુક્તઃ પૂર્ણચન્દ્ર ઇવ ॥૨૬૨॥
સર્વેન્ધનૈકરાશીકૃતસંદીપ્તો હ્યનન્તગુણતેજાઃ।
ધ્યાનાનલસ્તપઃપ્રશમસંવરહવિર્વિવૃદ્ધબલઃ ॥૨૬૩॥
ક્ષપકશ્રેણિમુપગતઃ સ સમર્થઃ સર્વકર્મિણાં કર્મ।
ક્ષપયિતુમેકો યદિ કર્મસઙ્ક્રમઃ સ્યાત્પરકૃતસ્ય ॥૨૬૪॥
પરકૃતકર્મણિ યસ્માન્નાક્રામતિ સંક્રમો વિભાગો વા।
તસ્માત્સત્ત્વાનાં કર્મ યસ્ય યત્તેન તદ્વેદ્યમ્ ॥૨૬૫॥
મસ્તકસૂચિવિનાશાત્તાલસ્ય યથા ધ્રુવો ભવતિ નાશઃ।
તદ્વત્કર્મવિનાશો હિ મોહનીયક્ષયે નિત્યમ્ ॥૨૬૬॥
છદ્મસ્થવીતરાગઃ કાલં સોઽન્તર્મુહૂર્તમથ ભૂત્વા।
યુગપદ્દ્વિવિધાવરણાન્તરાયકર્મક્ષયમવાપ્ય ॥૨૬૭॥
શાશ્વતમનન્તમનતિશયમનુપમમનુત્તરં નિરવશેષમ્।
સંપૂર્ણમપ્રતિહતં સમ્પ્રાપ્તઃ કેવલં જ્ઞાનમ્ ॥૨૬૮॥
કૃત્સ્ને લોકાલોકે વ્યતીસામ્પ્રતભવિષ્યતઃ કાલાન્।
દ્રવ્યગુણપર્યાયાણાં જ્ઞાતા દૃષ્ટા ચ સર્વાર્થૈઃ ॥૨૬૯॥
ક્ષીણચતુષ્કર્માંશો વેદ્યાયુર્નામગોત્રવેદયિતા।
વિહરતિ મુહૂર્તકાલં દેશોનાં પૂર્વકોટિં વા ॥૨૭૦॥
તેનાભિન્નં ચરમભવાયુર્દુર્ભેદમનપવર્તિત્વાત્।
તદુપગ્રહં ચ વેદ્યં તત્તુલ્યે નામગોત્રે ચ ॥૨૭૧॥
યસ્ય પુનઃ કેવલિનઃ કર્મ ભવત્યાયુષોઽતિરિક્તતરમ્।
સ સમુદ્ઘાતં ભગવાનથ ગચ્છતિ તત્સમીકર્તુમ્ ॥૨૭૨॥
દણ્ડં પ્રથમે સમયે કપાટમથ ચોત્તરે તથા સમયે।
મન્થાનમથ તૃતીયે લોકવ્યાપિ ચતુર્થે તુ ॥૨૭૩॥
સંહરતિ પઞ્ચમે ત્વન્તરાણિ મન્થાનમથ પુનઃ ષષ્ઠે।
સપ્તમકે તુ કપાટં સંહરતિ તતોઽષ્ટમે દણ્ડમ્ ॥૨૭૪॥
ઔદારિકપ્રયોક્તા પ્રથમાષ્ટમસમયયોરસાવિષ્ટઃ।
મિશ્રૌદારિકયોક્તા સપ્તમષષ્ઠદ્વિતીયેષુ ॥૨૭૫॥
કાર્મણશરીરયોગી ચતુર્થકે પઞ્ચકે તૃતીયે ચ।
સમયત્રયેઽપિ તસ્મિન્ ભવત્યનાહારકો નિયમાત્ ॥૨૭૬॥
સ સમુદ્ઘાતનિવૃત્તોઽથ મનોવાક્કાયયોગવાન્ ભગવાન્।
યતિયોગ્યયોગયોક્તા યોગનિરોધં મુનિરુપૈતિ ॥૨૭૭॥
પઞ્ચેન્દ્રિયોઽથ સંજ્ઞી યઃ પર્યાપ્તો જઘન્યયોગી સ્યાત્।
નિરુણદ્ધિ મનોયોગં તતોઽપ્યસંખ્યેયગુણહીનમ્ ॥૨૭૮॥

jainuniversity.org

દ્વિબન્દ્રિયસાધારણયોર્વાગુચ્છ્વાસાવધો જયતિ તદ્બત્।
પનકસ્ય કાયયોગં જઘન્યપર્યાપ્તસ્યાધઃ ॥૨૭૯॥
સૂક્ષ્મક્રિયમપ્રતિપાતી કાયયોગોપ-યોગતો (ગસ્તતો?) ધ્યાત્વા।
વિગતક્રિયમનિવર્તિત્વમુત્તરં ધ્યાયતિ પરેણ ॥૨૮૦॥
ચરમભવે સંસ્થાનં યાદૃગ્યસ્યોચ્છ્રયપ્રમાણં ચ।
તસ્માત્ત્રિભાગહીનાવગાહસંસ્થાનપરિણાહઃ ॥૨૮૧॥
સોઽથ મનોવાગુચ્છ્વાસકાયયોગક્રિયાર્થવિનિવૃત્તઃ।
અપરિમિતનિર્જરાત્મા સંસારમહાર્ણવોત્તીર્ણઃ ॥૨૮૨॥
ઈષદ્ધ્રસ્વાક્ષરપઞ્ચકોદ્ગિરણમાત્રતુલ્યકાલીયામ્।
સંયમવીર્યાપ્તબલઃ શૈલેશીમેતિ ગતલેશ્યઃ ॥૨૮૩॥
પૂર્વરચિતં ચ તસ્યાં સમયશ્રેણ્યામથ પ્રકૃતિશેષમ્।
સમયે સમયે ક્ષપયત્યસંખ્યગુણમુત્તરોત્તરતઃ ॥૨૮૪॥
ચરમે સમયે સંખ્યાતીતાન્વિનિહત્ય ચરમકર્માંશાન્।
ક્ષપયતિ યુગપત્ કૃત્સ્નં વેદાયુર્નામગોત્રગણમ્ ॥૨૮૫॥
સર્વગતિયોગ્યસંસારમૂલકરણાનિ સર્વભાવીનિ।
ઔદારિકતૈજસકાર્મણાનિ સર્વાત્મના ત્યક્ત્વા ॥૨૮૬॥
દેહત્રયનિર્મુક્તઃ પ્રાપ્યર્જુશ્રેણિવીતિમસ્પર્શામ્।
સમયેનૈકેનાવિગ્રહેણ ગત્વોર્ધ્વગતિમપ્રતિઘઃ ॥૨૮૭॥
સિદ્ધિક્ષેત્રે વિમલે જન્મજરામરણરોગનિર્મુક્તઃ।
લોકાગ્રગતઃ સિધ્યતિ સાકારેણોપયોગેન ॥૨૮૮॥
સાદિકમનન્તમનુપમમવ્યાબાધસુખમુત્તમં પ્રાપ્તઃ।
કેવલસમ્યક્ત્વજ્ઞાનદર્શનાત્મા ભવતિ મુક્તઃ ॥૨૮૯॥
મુક્તઃ સન્નાઽભાવઃ સ્વાલક્ષણ્યાત્સ્વતોઽર્થસિદ્ધેશ્ચ।
ભાવાન્તરસંક્રાન્તેઃ સર્વજ્ઞાજ્ઞોપદેશાચ્ચ ॥૨૯૦॥
ત્યક્ત્વા શરીરબન્ધનમિહૈવ કર્માષ્ટકક્ષયં કૃત્વા।
ન સ તિષ્ઠત્યનિબન્ધાદનાશ્રયાદપ્રયોગાચ્ચ ॥૨૯૧॥
નાધો ગૌરવવિગમાદશક્યભાવાચ્ચ ગચ્છતિ વિમુક્તઃ।
લોકાન્તાદપિ ન પરં પ્લવક ઇવોપગ્રહાભાવાત્ ॥૨૯૨॥
યોગપ્રયોગયોશ્ચાભાવાત્તિર્યગ્ ન તસ્ય ગતિરસ્તિ।
સિદ્ધસ્યોર્ધ્વં મુક્તસ્યાલોકાન્તાદ્ગતિર્ભવતિ ॥૨૯૩॥
પૂર્વપ્રયોગસિદ્ધેર્બન્ધચ્છેદાદસઙ્ગભાવાચ્ચ।
ગતિપરિણામાચ્ચ તથા સિદ્ધસ્યોર્ધ્વં ગતિઃ સિદ્ધા ॥૨૯૪॥
દેહમનોવૃત્તિભ્યાં ભવતઃ શારીરમાનસે દુઃખે।
તદભાવાત્તદભાવે સિદ્ધં સિદ્ધસ્ય સિદ્ધિસુખમ્ ॥૨૯૫॥
યસ્તુ યતિર્ઘટમાનઃ સમ્યક્ત્વજ્ઞાનશીલસંપન્નઃ।
વીર્યમનિગૂહમાનઃ શક્ત્યનુરુપં પ્રયત્નેન ॥૨૯૬॥
સંહનનાયુર્બલકાલવીર્યસંપત્સમાધિવૈકલ્યાત્।
કર્માતિગૌરવાદ્બા સ્વાર્થમકૃત્વોપરમમેતિ ॥૨૯૭॥
સૌધર્માદિષ્વન્યતમકેષુ સર્વાર્થસિદ્ધિચરમેષુ।
સ ભવતિ દેવો વૈમાનિકો મહર્દ્ધિદ્યુતિવપુષ્કઃ ॥૨૯૮॥

jainuniversity.org

તત્ર સુરલોકસૌખ્યં ચિરમનુભૂય સ્થિતિક્ષયાત્તસ્માત્।
પુનરપિ મનુષ્યલોકે ગુણવત્સુ મનુષ્યસંઘેષુ ॥૨૯૯॥
જન્મ સમવાપ્ય કુલબન્ધુવિભવરુપબલબુદ્ધિસંપન્નઃ।
શ્રદ્ધાસમ્યક્ત્વજ્ઞાનસંવરતપોબલસમગ્રઃ ॥૩૦૦॥
પૂર્વોક્તભાવનાભાવિતાન્તરાત્મા વિધૂતસંસારઃ।
સેત્સ્યતિ તતઃ પરં વા સ્વર્ગાન્તરિતસ્ત્રિભવભાવાત્ ॥૩૦૧॥
યશ્ચેહ જિનવરમતે ગૃહાશ્રમી નિશ્ચિતઃ સુવિદિતાર્થઃ।
દર્શનશીલવ્રતભાવનાભિરભિરઞ્જિતમનસ્કઃ ॥૩૦૨॥
સ્થૂલવધાનૃતચૌર્યપરસ્ત્રીરત્યરતિવર્જિતઃ સતતમ્।
દિગ્વ્રતમિહ દેશાવકાશિકમનર્થવિરતિં ચ ॥૩૦૩॥
સામાયિકં ચ કૃત્વા પૌષધમુપભોગપારિમાણ્યં ચ।
ન્યાયાગતં ચ કલ્પ્યં વિધિવત્પાત્રેષુ વિનિયોજ્યમ્ ॥૩૦૪॥
ચૈત્યાયતનપ્રસ્થાપનાનિ ચ કૃત્વા શક્તિતઃ પ્રયતઃ।
પૂજાશ્ચ ગન્ધમાલ્યાધિવાસપધૂપ્રદીપાદ્યાઃ ॥૩૦૫॥
પ્રશમરતિનિત્યતૃષિતો જિનગુરુસાધુજનવન્દનાભિરતઃ।
સંલેખનાં ચ કાલે યોગેનારાધ્ય સુવિશુદ્ધામ્ ॥૩૦૬॥
પ્રાપ્તઃ કલ્પેષ્વિન્દ્રત્વં વા સામાનિકત્વમન્યદ્બા।
સ્થાનમુદારં તત્રાનુભૂય ચ સુખં તદનુરુપમ્ ॥૩૦૭॥
નરલોકમેત્ય સર્વગુણસંપદં દુર્લભાં પુનર્લબ્ધ્વા।
શુદ્ધઃ સ સિદ્ધિમેષ્યતિ ભવાષ્ટકાભ્યન્તરે નિયમાત્ ॥૩૦૮॥
ઇત્યેવં પ્રશમરતેઃ ફલમિહ સ્વર્ગાપવર્ગયોશ્ચ શુભમ્।
સંપ્રાપ્યતેઽનગારૈરગારિભિશ્ચોત્તરગુણાઢ્યૈઃ ॥૩૦૯॥
જિનશાસનાર્ણવાદાકૃષ્ટાં ધર્મકથિકામિમાં શ્રુત્વા।
રત્નાકરાદિવ જરત્કપર્દિકામુદ્ધૃતાં ભક્ત્યા ॥૩૧૦॥
સદ્ભિર્ગુણદોષજ્ઞૈર્દોષાનુત્સૃજ્ય ગુણલવા ગ્રાહ્યા।
સર્વાત્મના ચ સતતં પ્રશમસુખાયૈવ યતિતવ્યમ્ ॥૩૧૧॥
યચ્ચાસમંજસમિહ છન્દઃશબ્દસમયાર્થતો (મયા?) ઽભિહિતમ્।
પુત્રાપરાધવન્મમમર્ષયિતવ્યં બુધૈઃ સર્વમ્ ॥૩૧૨॥
સર્વસુખમૂલબીજં સર્વાર્થવિનિશ્ચયપ્રકાશકરમ્।
સર્વગુણસિદ્ધિસાધનધનમર્હચ્છાસનં જયતિ ॥૩૧૩॥

jainuniversity.org
सर्व ज्ञानाय भवतु